स्यास्ति न च स्वात्मानं स्वयमेव संकटे पातयतः स्वतंत्रस्यास्तीति न परस्य स्वतः सृष्टौ प्रवृत्तिः संभवति नापि तेन
सह जीवस्याभेदः संभवति। जीवपरयोर्भेदे तु जीवादृष्टानुरोधेन राजवत्परो जीवभोगार्थं सृष्ट्यादौ प्र
वर्त्तते। स्वकृतमर्यादापरिपालनार्थं चेति युज्यते। अतः न तयोरभेदः संभवतीत्यर्थः॥१९॥ उत्तरमाह। दो
षइति॥ विभेदयोगविशेषेण भेदो ययोस्तौ विभेदौ विभिन्नौ तयोर्योगे भेदे न पुनरैक्ये महान्दोषः। अन्य
स्यान्यात्मत्वासंभवात्। अतो जीवपरयोस्तात्त्विको भेदो न युक्त इत्यर्थः। किं तर्हि अनादियोगेन न अत्रैतं
स्तन सुजातऽथाच॥ दोषो महान्नत्र विभेदयोगे ह्यनादियोगेन भवंति नित्याः॥ तथास्य नाधिक्य
मपैति किंचिदनादियोगेन भवंति पुंसः॥२०॥ शीलमस्येति अनादि भोग्यवर्गः स्थूलसूक्ष्मदेहद्वया
त्मकानि क्षेत्राणि तैः सह योगेन संबंधेन पुंसः परस्मात्सकाशात् नित्याः जीवा घटाकाशजलचंद्रा
दिन्यायेन भवंति उद्भवंति। तथा तेन औपाधिकेन भेदेनास्य आधिक्यं किंचिदपि न अपैति। नहि
जलचंद्रे कंपमाने मुख्यश्चंद्रः कंपते। नापि घटाकाशे चलति मुख्य आकाशे चलनं संभाव्यते।
तथा च श्रुतयः। एक एव तु भूतात्मा भूते भूते प्रकाशते। एकधा बहुधा चैव दृश्यते जलचंद्रवत्।
यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो दे

ज्ञानाऽत्कामं सर्वैव समवनीयं न इति कामयमानस्य अस्मादेहादुत्क्रांतस्य देहंमरणे नासद्रूपत्वं नयतः स्वर्गकारदृष्टांतेन पिपीलिकादिरूपांतरे कर्तव्यमुत्क्रांति कामस्य पूर्णब्रह्मभावं गतस्य उत्क्रांतिर्निषिध्यते ॥१८॥ ननु ज्ञानी कथं प्राप्नोति चेदन्यस्यात्मता योगात् परएव जीवत्वं प्राप्नोति स्फुटं भवति तत्वाद्युक्तं अत्र नियोज्यब्रह्मात्मत्वात् स्वरस्य सा शंका तां परेसाविति। तं परमात्मानं अजं जन्मादिहीनं पुराणं पुरि नवभिस्तनेन परिणामितं निरस्तं। तादृशो परं कोसौ नियुंक्ते यं नियोगादयं दुःखादिभाग्भवति। नियो
घ्यतराऽन्यात्मा को सौ नियुंक्ते तमजं पुराणं सर्वेदिदृक्षैः स्वैरमनुरूपेण। किं वास्य कार्यमथवा सुखं च तन्मे विद्वन्ब्रूहि सर्वं यथावत् ॥१९॥
[illegible]
जकांतरसत्वे तस्याप्यन्यस्ता स्याप्यन्य इति परानवस्थेति भावः ननु पर एव नियोजकांतरं विना इदं सर्वं चेतनाचेतनं विश्वं तत्स्रष्टा तदेवानुप्राविशदिति श्रुतेः। क्रमेण भवतीति शंकते सर्वे इति। एतद्दूषयति किं वेति। अस्य परस्याप्तकामतया निष्कामस्य किं वा कार्यं कर्तव्यमस्ति न किमपीत्यर्थः। प्रयोजनमनुद्दिश्य न मंदोपि प्रवर्ततइति न्यायेन प्रयोजनं विना परे प्रवृत्तिर्न संभवतीत्यर्थः। ननु लोकवत्तु लीलाकैवल्यमिति न्यायेन लोके निष्प्रयोजनापि चतुरंगादिक्रीडा दृश्यते तद्वत्सृष्ट्यादिलीलैव जगत्सृष्टिप्रवेशादिकमिति शंकास्याह सुखं वेति। चतुरंगादिक्रीडापि सुखार्थमेव क्रियते न च परस्य सुखलि

मंतु विनश्यति। यथोक्तं। कुरंगमातंगपतंगभृंगमीनाहताः पंचभिरेव पंचेति। फलितमाह कामादि
ति। विषयास्यत्कारजो दुःखरूपं यत्किंचित्सर्वं धुनुते नाशयति॥१३॥ विपक्षे दोषमाह॥ तम
इति॥ अयं कामो भूतानां तमः अज्ञानं तत्कार्यकरत्वात्। यतः अप्रकाशो नास्ति प्रकाशो विषय
विवेको यस्मिंस्तथा। अतएव नरकवद्दुःखदः। एतदेवाह मुह्यंतइति॥ यथा मुह्यंतो मदिरा
मत्ताः गच्छंतइति पाठे गहगह्वरीताः पथि गच्छंतः श्वभ्रवत् गर्त्तयुक्तं रौद्रे धावंति तथा कामि
नः संसारे वर्त्तमानाः सुखप्रदं पार्थं दीप्रति धावंतीत्यर्थः॥१४॥ अमृतवृत्तेः कामेनानभिभूत
चित्तस्य पुंसस्त्वरणमयव्याघ्रवत् मृत्युर्यमः किं कुर्यान्न किमपीत्यर्थः। यस्मादेवं तस्मादस्य के
मस्य आयुः जीवनं मत्वा ज्ञानं निर्णुदन् अपनेष्यन् अन्यत् किंचित्काम्यमानं स्त्र्यादिकं मममन्य
मानः अगणयन् नाधीयीत न स्मरेत् तु एव बुध्या विषयाविस्मरणमेव काममूलोच्छेदहेतुरि
त्यर्थः। यदाह वशिष्ठः। भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत्। अपुनः स्मरणं मन्ये सा

संकल्पहृतात्मा इति दोषो रागादिः। मिथ्यार्थयोगेन विषयसंगेन अपहृतांतरात्मा व्यथितचि
त्तः सन् विषयान्स्मरन् स्मरणपूर्वकमुपास्ते हेतौ शतृप्रत्ययः। स्मरणमेव विषयोपासने
हेतुरतस्तेषां विस्मरणमेव कर्तव्यमित्यर्थः॥१०॥ तत्स्मरणे दोषमाह। अभिध्येति। अभिध्या
विषयस्मरणं प्रथमं ततः कामः तत्प्राप्त्यभिलाषः केनचिन्निमित्तेन तत्प्राप्तिहतौ क्रोधः एते
अभिध्यादयः एवं क्रमेण बालान् अजितचित्तान् मृत्यवे मोहाय प्रापयंति। ये तु धीराः जितचित्ताः
निष्कामास्ते मृत्युं तरंति॥ पाठांतरे धर्मयोगाभ्यासं चरंति॥११॥ स इति॥ सः मृत्युतरणकामः
योगी वा अभिध्यायन् आत्मानं चिंतयन् उत्पतितान् कामानेव निहन्यात्। हननोपायमाह॥
अनादरेण तुच्छत्वबुद्ध्या पथि पतिततृणवत् स्थितान् प्राप्तानपि अबुध्यमानः अचेतयन्
य एवं विद्वान् भूत्वा कामान्निहंति एनं पुरुषं मृत्युरज्ञानं मृत्युरिव यमइव नात्ति न ग्रसते॥
निष्कामस्य मृत्युभयं नास्तीत्यर्थः॥१२॥ सकामं निंदति। कामानुसारी ति॥ विषयार्थी विषय

आद्या

इदं सर्वं तत एव आततं तस्माज्जातं तत् आत्मत्वेन प्रसिद्धं तत् तच्छब्दवाच्यं । तदिति वा एतस्य महतो
भूतस्य नाम भवतीति श्रुतिप्रसिद्धेः । वक्तुं न शक्नुमः । वाचामगोचरं तं योगिनः पश्यंति ॥ १ ॥ इदानी
तद्दर्शनाभ्युपायं योगं संक्षेपेणाह । अपानमिति ॥ गिरति उपसंहरति स्वात्मनि । योगशास्त्रोक्तरीत्या

सर्वमेव ततो विधात्तत्त्वं द्रष्टुं न शक्नुमः ॥ योगिनस्तं प्रपश्यंति भगवंतं सनातनं ॥ १ ॥ अपानं गि
रति प्राणः प्राणं गिरति चंद्रमाः ॥ आदित्यो गिरते चंद्रमादित्यं गिरते परः ॥ योगिनस्तं प्रपश्यंति भगवं० ॥ २ ॥

पार्ष्णिना गुदमापीड्य दंतैर्दंतानसंस्पृशन् ॥ हृदासनोऽपानवायुमुन्नये शनैः शनैः । तं प्राणेनैक
त्रानीत्वा शिरोरंध्रं नीत्वा हृदंबरे । चेतोमात्रेण तिष्ठेत तच्च बुद्धौ विलापयेत् । चंद्रमा अत्र मनः आदित्यो
बुद्धिः परः परमात्मा एवं च आदित्यं गिरति तं योगिनः पश्यंति ॥ २ ॥

न्यतरस्यापि पूर्णत्वं नयुज्यते तदुपाधिरध्यस्तएव । तथा चाधिकाराध्यस्तयोर्विषमसत्ताकयोरन्यपरस्परपरिच्छे
दकत्वं किंचितरेतरतिरोधायकत्वमेवास्तीति स्वस्वप्रतीतिकाले द्वयोरपि पूर्णत्वं प्रतियोगिनोस्तदानीमदर्श
नात् ब्रह्मण्यध्यस्तउपाधिर्जीवेश्वरभेदहेतुरित्यर्थः । यदा तु पूर्णानि ज्ञानादीनि ब्रह्मण्यध्यस्तानि पूर्णाद्
ब्रह्मणः सकाशात् हरति सम्यगवेक्षणेन दूरीकुर्वीत रज्जुतत्त्वसर्पतदा जीवेशभेदनिमित्तस्योपाधेरभावात् पूर्ण
ब्रह्मैवावशिष्यते । यथोक्तं विष्णुपुराणे । विभेदजनके ऽज्ञाने नाशमात्यंतिकं गते । आत्मनो ब्रह्मणो भेदमसंतं कः
करिष्यतीति । एवं च अंशांशित्वरूपेण जीवेशयोर्भेदानुपगमादनुपचरितस्तयोरभेदप्रतिपादकस्तत्त्वमस्यहं
ब्रह्मास्म्ययमात्मा ब्रह्मेत्यादिराम्नाय इति सिद्धं । पूर्णं शिष्यते तं भगवंतं योगिनः पश्यंति ॥१०॥

तस्माद्धि वायुरायातस्तस्मिंश्च प्रयतः सदा । तस्मादग्निश्च सोमश्च तस्मिंश्च प्राण आततः ॥११॥

तस्मात्पूर्णात् वायुरिति पंचानामपि भूतानामुपलक्षणं । तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशा
द्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । इति तत एव सर्वभूतोद्भवश्रुतेः । प्रयतः निगृहीतः एतेन तत्रैव लयं
दर्शयता तदुपादानकत्वं भूतानामुक्तं । अग्निर्भोक्ता सोमो भोज्यं । प्राण इति देहेंद्रियादिसंघातग्रहणं ॥११॥

च ब्रह्माद्वैतं शिष्टं। येन मृत्युर्नास्तीति पक्षः सुस्थिरः। येषां च मते कर्मणा मृत्युनाशस्तेषामपि क्रममुक्तिप्रनाड्या
कर्मणां मोक्षहेतुत्वं च स्थितं। ये केचित्तु अस्मिन्मोक्षे निमित्ते धर्मान् अग्निहोत्रादीनि कर्माणि नाचरंति किंतु
मोक्षार्थं संन्यासमेव कुर्वंति। ये केचित् क्रममुक्त्यर्थं कर्माण्येव उपासनासहितानि कुर्वंति। येषां तु तादृशो महान्
धर्मो नास्ति किंतु अल्प एवाग्निहोत्रादिनित्यानुष्ठानासक्तोस्ति तेषामपि स धर्मः पापेन रागादिदोषेण हन्य
ते। उत धर्म एव पापं हंतीति प्रश्नार्थः॥२२॥ उत्तरमाह॥ उभयमिति॥ तत्र मोक्षे उभयं संन्यासः सोपासनं कर्म

सनत्सुजात उवाच॥ उभयमेव तत्रोपयुज्यते॥ फलं धर्मस्यैवेतरस्य च॥२३॥

च उपयुज्यते तथा धर्मस्य फलं स्वर्गः चित्तशुद्धिर्वा इतरस्य अधर्मस्य पापस्य नित्य
कर्मत्यागस्य वा फलं नरकः उपभुज्यत इति॥२३॥

इदमेव संग्रहवाक्यं विवृणोति तस्मिन्स्थित इति द्वयोः उभयं संन्यासः सोपासनं कर्म च तस्मिन्नाश्रमे स्वस्व
रूपे स्थितो स्थितिनिमित्तं निसंशयं विचलं वा शब्द एवार्थः । तयोर्विशेषमाह ज्ञानेनेति संन्यासपूर्वकेण ज्ञा
नेन ब्रह्मविद्यया सिद्धं निःसंदिग्धं तं ब्रह्म प्रतिहंति अन्तरायं दुःखादि आत्मिकं त्येन सच्चिदानंदात्मकं ग
च्छति प्राप्नोति । हेतेरत्र गमनार्थत्वं ज्ञेयं । तथा सोपासनेन कर्मणा ऽन्यथा सिद्धो विपरीतं साध्यं पुण्यं प्रश

तास्मिन्स्थितो वाप्युभयं हि निसंज्ञानेन विद्यास्मृति हंति सिद्धं ॥ तथान्यथा पुण्यमुपैति देही तथागतं
पापमुपैति सिद्धं ॥२४॥

पुण्यं देवतादिभावमुपैति यतः देही देहाभिमानी भवति तथागतं तेन प्रकारेण स्थितं
सिद्धं नरं देहाभिमानं ते पापमपि कदाचिदुपैति देवभावं प्राप्तोपि कदाचिन्मुच्य
ते ऽन्यथा जयविजयादिवत् तु ततो ऽवश्यं सर्पोति ज्ञानमेव श्रेष्ठमिति भावः ॥
२४॥

फलं धर्मस्यैवेतरस्य चेत्सुचरार्द्धं विवृणोति॥ गत्वेति॥ उभयं पुण्यस्य पापस्य च फलं स्वर्गनरकाख्यं त
च्च अस्थिरं क्षयिष्णु गत्वा प्राप्य पुनरस्मिन् लोके कर्मणा पूर्वसंस्कारानुगुणेन तत्तद्योग्यत्वचिंतेन युज्य
ते योगं प्राप्नोति कर्म कृत्वा तत्फलं भुक्त्वा पुनः कर्मैव कुरुते तेन कर्मपाशान्न मुच्यत इत्यर्थः॥ य

गत्वोभयं कर्मणा युज्यते ऽस्थिरं पुण्यस्य पापस्य स चापि कर्मणा॥ धर्मेण पापं प्रणुदतीह विद्वान्धर्मो
बलीयानिति तस्य सिद्धिः॥२८॥

यद्येवं तथापि स चापि कर्मयोगी कर्मणा धर्मेण धर्मरूपेण पापं प्रणुदति दूरीकरोति विद्वान्
मूढस्तु कर्मणः फलं स्वर्गपश्वादिकमेवेच्छतीति भावः॥ अतो हेतोः धर्मो बलीयान्नत्व
धर्म इति हेतोः तस्य धर्मं कुर्वतः सिद्धिः कालेन रागादिदोषनाशाय कषायपक्तिद्वारा मो
क्षोप्यस्तीत्यर्थः॥ विद्धीति पाठे सिद्धिमिति शेषः॥२८॥

काम्यो धर्मः पापं च बंधहेतुः निष्कामधर्मज्ञं च पुण्यं मोक्षहेतुरिति मन्वानः पृच्छति। यानि हाहुरिति।
त्र्यपामसोममभूताअभूम। अस्त्यष्ट हवै चातुर्मास्ययाजिनः सुकृतं भवति। यस्यैतेऽष्टाचत्वारिंशत्संस्का
राः स ब्रह्मणः सायुज्यं सलोकतां गच्छति साद्याः श्रुतयः स्मृतयश्च पुण्यकृतां द्विजातीनां स्वस्य धर्म

फलतरगुरुत्वाच्च। यानि हाहुः स्वस्य धर्मस्य लोकान् द्विजातीनां पुण्यकृतां सनातनान्। तेषामक्रमा
कथं ततोपि चान्यान् नैतद् द्विद्वेतुमिच्छामि कर्म॥२६॥

स्य फलभूतान् सनातनान् निस्यान् लोकान् आहुः तेषां क्रमान् धर्मतारतम्येन उच्चनीचभावं कथ
य। ततोपि चान्यान् निरतिशयान् ब्रह्मानंदरूपान्। बहु संप्रजायां। मोक्षसुखं च कथय।
एतस्य धर्मादन्यत् स्वाभाविकफलं निर्विषयहेतुं निषिद्धं काम्यं च कर्म वेदितुं नेच्छामि। एतेन
स्वस्य वैराग्यं दर्शितं। प्रकृते च तदुपयोगोऽस्तीति ज्ञेयं॥२६॥

उत्तरमाह। येषामिति॥ व्रते यमनियमादिरूपे विस्पर्द्धा अहमन्येभ्योऽधिकं यमादीन्साधयिष्यामि अहमन्येभ्य इति संघर्षः विश्वामित्रो वसिष्ठादिवत्तपस्यप्नि निवेश इति यावत् बलव

सनत्सुजात उवाच॥ येषां व्रतेथ विस्पर्द्धा बले बलवतामिव॥ ते ब्राह्मणा इतः प्रेत्य ब्रह्मलोकप्रकाशकाः॥२७॥

तां मल्लादीनामिव। यौ ते गिनो ब्राह्मणाः सगुणब्रह्मविद इतो देहात् प्रेत्य गत्वा ब्रह्मलोके तेजस्विनः पूज्याः भवंति। ततो मुक्तिं च ब्रह्मणा सह प्राप्नुवंति। तथा च स्मर्यते ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते कृतात्मानः प्रविशंति परं पदमिति॥२७॥

सर्वधर्मस्ययोगधर्मस्यफलमुक्तं इज्याधर्मस्यफलमाहायेषामिति॥ हे रामेमेवयज्ञादीन्स
र्वोत्कर्षेणानुतिष्ठेयमिति येज्ञानाग्नंहः तेषांतत्वयज्ञादिकं ज्ञानस्यसाधनं विविदिषोत्पादनद्वा

येषांधर्मोविस्पष्टः तेषांज्ञानसाधनं॥ तेब्राह्मणाइतोमुक्ताःस्वर्गंयांतित्रिविष्टपं॥२८॥

राभवातितथाचश्रुतिः तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसा
नाशकेनेति। त्रिविष्टपंदेवलोकंनतुसत्यलोकं। विविदिषायाधर्ममपिकर्मानुतिष्ठतांआनु
षंगिकंस्वर्गफलमपिभवतीत्यर्थः। यदाहापस्तंबः। तद्यथाम्रेफलार्थेनिमितेछायागं
धइत्यनूत्पद्यंतेएवंधर्मंचर्यमाणमर्थाअनूत्पद्यंतइति॥२८॥

ये तु अकरणे प्रत्यवायं मत्वा धर्मार्थमेव धर्ममनुतिष्ठंति। न ज्ञानार्थं नापि स्वर्गार्थं तानाह। तस्ये
ति। तस्य धर्मस्य समाचारं सम्यगनुष्ठानं वेदविदो वैदिकत्वाभिमानिनो ज्ञानाः सम्यगिति आहुः
तु न ते ततः किंचिदैहिकमामुष्मिकं वा फलं कामयंते। एनं ज्ञानं एना ज्ञानानुरूपिष्ठमयं ते न मन्ये

तस्य सम्यक्समाचाचरमाहुर्वेदविदो ज्ञानाः। नैनं मन्ये तद्विष्ठं बाह्यमाभ्यंतरं ज्ञने॥ २९॥

तं नमानये तं किंचित्तु मानुये देवे सर्थः। तमेव विशिनष्टि बाह्ये आत्मनि वर्णाश्रमवयोवस्था
भिमानित्वात् बहिर्मुखं। वैदिकत्वाभिमानात् आभ्यंतरं यतः अकामहतस्य श्रोत्रियस्य का
मोपमर्दनात् ते मन्येन हिरण्यगर्भादिवर्वाचीनानां मानुषादीनामानंदगणनायां उत्तरोत्तरश
तगुणितायां स एक इंद्रस्यानंदः स एकः प्रजापतेरानंद इति प्रतिपर्यायं श्रोत्रियस्य चाकामहतस्य

एवंयोगिनामात्मविविदिषूणांनिष्कामवर्णाश्रमाभिमानिनांचधर्मःउत्तममध्यमाधमभावेनत्रोक्तः।
तेष्वपिअहिंसाप्रधानामौलिधर्मोनाहायत्तमन्येतेति॥ यद्वाटेः नंपानेचब्राह्मणस्यसंन्यासिनः
भूयिष्ठमस्तीतिमन्येतज्ञानीयात्। ततूरे ऽप्यापन्नोऽपिजीवेत्प्राणयात्रांकुर्यात्। नक्षीणरतिंग्रह

यन्नमन्येतभूयिष्ठं आहजीवतृणोल्पं॥ ज्ञानंपानंब्राह्मणस्यतज्जीवन्नानुसंज्वरेत्॥३०॥
यत्राकथ्यमानस्यप्रयच्छत्यशिवंभयं॥ अतिरिक्तमिवाकुर्वन्सज्ञेयान्येतरोजनः॥३१॥

स्वंपीडयेदितिभावः। आह्नषिवर्षाकालेत्वणंचडुलपाठश्च ततरंत्वणांत्वणोदकमितिपाठान्तरं।
नानुसंज्वरेत्क्षुद्बाधयात्मानंनपीडयेदित्यर्थः॥३०॥ यद्देशोऽकथ्यमानस्यस्वमाहात्म्यंअ
प्रकाशयतःअशिवममंगलंभयंप्रयच्छति। सत्यमेतमितिदं। यद्यपदेऽपिदेशेस्थित्वासत्यापिसामर्थ्ये
तत्रयजनमध्येआत्मानंस्वविद्यादिनाऽतिरिक्तमधिकमिवअकुर्वन्सोत्कर्षमप्रकाशयन्योऽ
नोभवतिसज्ञेयान्प्रशस्ततरः। परपीड्यमानेचयददेतिश्लो० कदर्थः॥३१॥

श्वाशुनकः ते संन्यासिनः स्ववीर्यस्य स्वयं पाण्डित्यस्य उपजीवनात् पाण्डित्यादिकं प्रकाश्य भिक्षां इच्छ-
न्ति यतिवेषताशीप्यवती सर्थः ॥३३॥ यब्राह्मणः ब्रह्मविद् ज्ञातीनां मध्ये वसन्नपि ज्ञातयो मे मम नि-
ये अज्ञाताचर्या याभिरस्तो अज्ञाते चर्याः संतु इति मन्येत ज्ञातयो मे योगगतिं मा ज्ञासिषुरिति यस्य

यथास्वं वांतमश्नाति श्वा वै नित्यमभूतये ॥ एवं वै वांतमश्नाति स्ववीर्यस्योपसेवनात् ॥३४॥
नित्यमज्ञातचर्या मे इति मन्येत ब्राह्मणः ॥ ज्ञातीनां तु वसन्मध्ये तं विदुर्ब्राह्मणं बुधाः ॥३६॥
कोऽस्यनंतरमात्मानं ब्राह्मणो हंतुमर्हति ॥ निर्लिंगमचलं शुद्धं सर्वद्वैतविवर्जितं ॥३७॥

प्रच्छन्नतेजसो मतिस्तं ब्राह्मणं ब्रह्मिष्ठं बुधाः तल्लक्षणज्ञाः विदुः ॥३८॥ ईदृशीं चर्यां वि-
नाऽनंतरमुपाधिकृतव्यवधानरहितमात्मानं प्रपंचं निर्लिंगं अनुमानाद्यगम्यं अचलं
व्यापकं शुद्धमसंगं सर्वद्वैतविवर्जितं सजातीयविजातीयस्वगतभेदशून्यं हंतुं गंतुं ।
हंतेर्गत्यर्थत्वमत्र ज्ञेयं । ज्ञातुमित्यर्थः । कोऽर्हति न कोपीत्यर्थः ॥३९॥

१३

ब्रह्मस्वप्रकाशेन आवृतिभ्राधिरूढं भवति येन। सोऽप्यात्मनोऽब्रह्मभावं पश्यतीति स
हृश्लोकोवाऽर्थः। पाठांतरे तु सुगमं॥३६॥ आत्मा ज्ञाने दोषमाह। य इति। अन्यथा आत्मनो
न भासमानाद्देहादेर्विपरीतं ब्रह्म संतं अन्यथा कर्त्रादिरूपं। शेषं स्पष्टार्थं॥३७॥ आत्मतत्त्व

तस्माद्धि क्षत्रियस्यापि ब्राह्मणो वसति पश्यति॥३६॥ योऽन्यथा संतमात्मानमन्यथा प्रतिप
द्यते॥ किं तेन न कृतं पापं चौरेणात्मापहारिणा॥३७॥ अभ्रांतः स्यादनादाता सस्मृतो नि
रुपद्रवः॥ शिष्टो न शिष्टवत्स स्याद्ब्राह्मणो ब्रह्मवित्कविः॥३८॥

भिन्नैः

ज्ञातिपरूपायमाह। अभ्रांत इति। अभ्रांतः भ्रमरहितैः यतः अनादाता आदानशून्यः
निष्परिग्रह इत्यर्थः। अत एव संमतः शिष्टानां। निरुपद्रवश्च स्वयं भवति। तथा शि
ष्टोऽपि शिष्टवन्नैस्यात्। शिष्टत्वं न प्रकाशयेत्। पाठांतरे शिष्टवत् यथेष्टाचरणश्च स्या
त्। किंतु शिष्ट एव वैदिकमर्यादापरिपालनेपर एव स्यात्। कविः क्रांतदर्शी॥३८॥

१३

महाव्रता महाव्रतानि। सुपां सुलुगिति सुपो डादेशः। छांदसः॥५॥ नास्य स्वं स्वीयं किमपि नास्ति धर्मादिष्वेकैक
स्मिन्नपि पक्षपाते सति तदर्थं सर्वं यजतीत्यर्थः॥६॥ ब्रह्मैव मुख्यं प्राप्यं येषां तेषां॥७॥ परीवादः परदोषकीर्त्तनं सत्
यथाभूतं। असदारोपितं॥८॥ अप्रकीर्त्तित इतीदम् विरोधिन एव जातिकूल्यादयो मदरोषहेतुत्वेन सूचिता। अपि भ्रं
गम्या हि कृपाप्रकर्षेण विधिमुखेन नञोऽस्यार्थः। लोकद्वेष्यं पारदार्यादि। प्रातिकूल्यं धर्मादौ विघ्नाचरणं। अभ्यसू
या गुणिषु दोषारोपः॥९॥ कामः स्वाभिलाषः। पारतंत्र्यं मद्यादिवशत्वं। पैशुनं राजद्वारादौ परदोषसूचनं। अर्थहानिर्नटन
र्तकवेश्यादिषु दंडेन वा वित्तनाशः। विवादो वैरं॥१०॥ मोहो गर्वः दर्पहेतुः। हृष्टो दृप्यतीत्यापस्तंबोक्तेः। अतिवादो निर्मर्याद

धर्मश्च सत्यं च तपो दमश्च अमात्सर्यं ह्रीस्तितिक्षानसूया॥ दानं श्रुतं चैव धृतिः क्षमा च महाव्रता द्वादश ब्राह्मणस्य॥५॥
यो नैतेभ्यः प्रच्यवेद्द्वादशेभ्यः सर्वामपीमां पृथिवीं स शिष्यात्॥ त्रिभिर्द्वाभ्यामेकतो वाधितो यो नास्य स्वमस्तीति च वेदितव्यं॥६॥
दमस्त्यागोऽप्रमादश्चैतेष्वमृतं स्थितं॥ एतानि ब्रह्ममुख्यानां ब्राह्मणानां मनीषिणां॥७॥ सदसत्परीवादो ब्राह्मणस्य न शस्य
ते॥ नरकप्रतिष्ठास्ते स्युर्य एवं कुर्वते जनाः॥८॥ मदोऽष्टादशदोषः स स्यात्पुरा योऽप्रकीर्त्तितः॥ लोकद्वेष्यं प्रातिकूल्यमभ्यसूया मृ
षावचः॥९॥ कामक्रोधौ पारतंत्र्यं परिवादोऽथ पैशुनं॥ अर्थहानिर्विवादश्च मात्सर्यं प्राणिपीडनं॥१०॥ ईर्ष्या मोदोऽतिवादश्च सं
ज्ञानाशोऽभ्यसूयिता॥ तस्मात्प्राज्ञो न माद्येत सदा ह्येतद्विगर्हितं॥११॥

वचनं। संज्ञानाशः कार्याकार्यविवेकराहित्यं। अभ्यसूयिता नैरंतर्येण परद्रोहशीलता। एतन्मदवत्त्वं विगर्हितं निंदितं स
द्भिः सदा हि सापत्कालेऽपि नाऽन्यथा नीचमिति सूचितं॥११॥

समाप्ता ज्ञानप्रधाना योगोपसर्जना ब्रह्मविद्या। इदानीं योगप्रधानां ज्ञानोपसर्ज... ...।१ क्रमध्यायद्वयमा
रभ्यते। यत्र पूर्वं चित्तवृत्तिनिरोधेन स्वपदार्थं ज्ञात्वा पश्चाद्वेदान्तश्रवणादिना तत्स्वब्रह्मत्वं निश्चीयते सा क्र
मा। यत्र तु श्रवणादिना एवं पारोक्ष्येण प्रतीतो ब्रह्मभावो निश्चयः पश्चान्निदिध्यासनेन स आपरोक्षी क्रि
यते सा द्वितीया। क्रमद्वयेऽपि फलैक्यात् साधनजालमपि एकरूपमेवेति दर्शयितुं प्रागुक्तानेव हेयान्दोषानुपादे
यांश्च गुणांश्च दर्शयति। शोकः क्रोधश्चेत्यादिना। तत्र क्रोधादयः प्राग्व्याख्याता एव क्वचित् क्वचित् विशेषो दृश्य
ते स एव व्याख्यायते। लोभः स्पृहा। मोहः प्रज्ञाबाध्यभावः। अत्रापि लोभ इति पाठेऽपि स एवार्थः। लुप विमोहन इति
धात्वर्थानुगमात्। परासुता निद्रापरत्वं। कृपान्नस्नेहः॥१॥ पापं पापफलं कर्म। व्यवस्यत्यारभते। मूढसंज्ञः मूढबु

सनत्कः॥ शोकः क्रोधश्च लोभश्च कामो मानः परासुता॥ ईर्ष्या मानो विधित्सा च कृपासूया जुगुप्सुता॥१॥ द्वाद
शैते महादोषा मनुष्यप्राणनाशनाः॥ एकैकमेते राजेन्द्र मनुष्यान्पर्युपासते॥ यैराविष्टो नरः पापं मूढसंज्ञो व्यवस्यति
स्पृहयालुरुग्रः परुषो वदान्यः क्रोधं बिभ्रन्मनसा वै विकत्थी॥ नृशंसधर्माः षडिमे जना वै प्राप्याप्यर्थं नोत सभाज्य
संभोगसंविद्विषमोऽतिमानी दत्त्वा विकत्थी कृपणो दुर्बलश्च॥ बहुप्रशंसी वनिताद्विट् सदैव सप्तैवोक्ताः पापशी
नृशंसाः॥४॥

उग्रो निर्दयः। परुषो रूक्षवाक्। अवदान्यो बहुभाषी। ओजसे जयंते परं न मानयंति॥३॥ बहुप्रशंसी आत्मस्तु
तिपरः॥४॥

गं. ल.
३

मानंनिगदितुम्। अमर्षंज्ञानायाः परममनुरोधंगिरिभुवोविहायश्रीकं
ठः शिरसिनियतंधारयतियाम्॥ १२ विनिंद्यान्युन्मत्तैरपिचपरिहार्या
णिपतितैरवाच्यानिव्रात्यैः सपुलकमपास्यानिपिशुनैः। हरंतीलोका
नामनवरतमेनांसिकियतांकदाप्यश्रांतात्वंजगतिपुनरेकाविजयसे।
स्खलंतीस्वर्लोकादवनितलशोकापहृतयेजटाजूटग्रंथौयदसिविनि
बद्धापुरभिदा। अयेनिर्लोभानामपिमनसिलोभंजनयतांगुणानामेवा
यंतवजननिदोषः परिणतः॥ १४ जडा——नंधान्पंगून्प्रकृतिबधिरानु

राम.
३

१०

२८

गामाह्नोकानां जनिमरणशोकापहरणं तदेतत्तेतीरं श्रमशमनधीरं भ

शातुनः ९ नयत्नात्ताद्दैरपिगलितभेदैरवसितं नयस्मिन्जीवानां प्र

सरतिमनोवागवसरः निराकारं नित्यं निजमहिमनिर्वासिततमो विशु

द्धं यत्तत्त्वं स्फुरतु दितित्वं नविषयः १० महास्थानैर्ध्यानैर्बहुविधवितानै

रपिचयन्नलभ्यं घोराभिः सुविमलतपोराजिभिरपि अचिंत्यं तद्विष्णोः

पदमखिलसाधारणतया द्रुतानायेनाखिलमिह तुलनीयाकथ्यनः ११

न्नरणमीलाभानाद्यपिपरिहरंत्याभवभयं शिवायास्ते मूर्तेः कइहमहि

यं लक्षणं २ उः सहो ४ यो २

लं तस्य यदा स्याद्कः काकः ॥ अथ विषमम् । विरुद्धधर्म्माध्यासाद्द्वयोः संबंधायोग्यत्वं निर्देशाद्
त्र्यैकम् । अभीष्टफलालाभे ऽनिष्टफलं लाभश्चेति द्वितीयम् । कार्य्यकारणयोर्गुणयोर्विरोधश्चेति तृतीयम्
कार्य्यकारणयोः क्रियायोर्विरोधश्चेति चतुर्थम् ॥ क्रमेण यथा । शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना ।
अयं क्व च कुकूलाग्निकर्कशो मदनज्वरः ॥ तथा । सिंहिकासुतसंत्रस्तः शशश्चन्द्रं समाश्रितः । अग्र
से साश्रयं तत्र तमन्यः सिंहिकासुतः ॥ तथा । स्पष्टं करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाण
लेखा । तमालनीला शरदिन्दुकान्तं यशस्त्रिलोकाभरणं प्रसूते ॥ तथा । आनन्दममन्दमिमं कुव
लयलोचने ददासि त्वम् । विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥ न चात्र विरोधो ऽसंग
तिर्वास्मादिति वाच्यम् । विरोधस्याविवक्षितत्वात् । कार्य्यकारणरूपानुकारस्येति ध्येयम् ॥
अथाधिकम् । आश्रितमहत्त्वादाश्रयमहत्त्वम् । आश्रयमहत्त्वादाश्रितमहत्त्वं नो भयथाप्याधि
किंतु

यो: कलि यो १

तथा २ न २ सामा २ एतत्स्याकलयेत् ६

कत्वमन्तहृतम्। यथा। अहो विशालं भूपाल भुवनत्रितयोदरम्। माति मातुमशक्योपि यशोराशिर्यदत्र ते।
द्वितीयं यथा। युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत। तनौ ममुस्तत्र न कैट-
भद्विषस्तपोधनाभ्यागमसंभवा मुदः। प्रथमोदाहरणे अहो विशालमित्यादौ मातुमशक्ययशोरा-
शेरधिकतया आधारस्य महत्त्वं प्रतीयते। पर्यन्ते च यशोराशेर्विशालतापरत्वमित्येकमधिकम्।
द्वितीये तथाविधेऽपि तस्मिन्नाभावानुदोषमहत्त्वम्। उभयत्रैव वक्तृप्रकर्षतात्पर्यमित्थं वा।
अथ प्रत्यनीकम्। वक्तुमुपमेयस्तुत्यर्थमुपमानं न तत्क्रियाभिप्रायोऽत्र। तस्याविरोधी तुल्याकल्पो,
तत्प्रत्यनीकं तदर्थोऽपि प्रतिपक्षं तिरस्कर्तुमसमर्थेन तदीयस्य तिरस्कृतिस्तत्प्रत्यनीकम्॥
यथा यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः। कान्तवक्त्रसदृशाकृतिं कृती राहु-
रिन्दुमधुनापि बाधते। नन्विन्दोस्तदीयत्वाभावात्कथं प्रत्यनीकमिति चेत्। उच्यते। साक्षा-

तत्कस्ये ३

स ८४ ८४ १२ तोद्भ्यते

नन्वेवमध्ययनयागादेर्वैयर्थ्यं स्यादित्याशंक्य श्लोकपत्तिमाह । छंदांसीति ॥ एषउपनिषत्प्रसिद्धः ॥ अथ वा
महानुनिर्महर्षिसंघैर्यानि पुराजगौ तान्येव छंदांसि उपनिषद्रूपाणि नाम निश्चितं । छादयंति विवारंतं छंदां
सि पापात्कर्मण इति श्रुतेः छंदःशब्दनिर्वचनात् ... वा स्यते अहं कायजा सूपा इति अथर्वशोपनिषदि यज्ञा
नोपापादुक्षितमसामर्थ्यदर्शनात्ब्रह्मविद्यापर्णानी छंदांसि मुख्यं छंदस्त्वं कर्माधीनानां गौणमिति भावः । किं
चाउतन्यादि । येपि अधीतवेदाः सोपनिषत्कं वेदं पाठतोधीतं तत्त्व अधीतवंतः तेपि न छंदोविदः । यतः वेदवेद्य
औपनिषदस्य पुरुषस्य तत्त्वं यथावन्न विदन्न जानंति । अथ वा चरति मा पयेषवाचं ... अर्थात्त्वफलानपुष्या
मिति पुष्पं हि पत्रं वाचः सत्यामिति श्रुतिश्चैतदाह । सत्यं परं ब्रह्म ॥ ५० ॥ छंदांसि नामेति । द्विपदां मनुष्याणां मध्ये

छंदांसि नाम क्षत्रियपत्नां यं गर्वा पुराजगौ महर्षिसंघ एव ॥ छंदांसि वेदस्तेयजुतनाधीतवेदा नव वेदवेदस्य विदुर्दितं ... ॥ ५ ॥
छंदांसि नाम द्विपदां च सिद्धस्वच्छंदयोगेन भवंतितत्र ॥ छंदोविदस्तेन च तानधीत्य गत्वा न वेदस्य न वेदयामायी ॥ ५ ॥
वरिष्ठतत्त्वसत्वे ब्रह्माणि विषये छंदांसि वेदाः स्वच्छंदयोगेन स्वात्मसंबंधेनैव भवंतीति । दुर्मेधांशार्थज्ञानवतत्त्वम
... ह्यर्थज्ञानेनेमधेऽनुष्ठानांतरमपेक्षते । तथाहि । तद्धृतस्य ... ऋषिर्वामदेवः प्रतिपेदेहं मनुरभवं सूर्यश्च

तिष्ठत्यादर्शनिसार्वभ्रंशोर्मे ऽतिष्ठन्नायत्नीसाद्दोतिष्ठ तिगादसोर्मध्येइव कार्यांतरं बार्धते तेन च ज्ञातेन सते
म। वक्तारेएव कारार्थं। तेनैवेदस्यार्थः। छंदोविदो नवेति। वक्तृ मे माने ज्ञानेन। तारछंदोज्ञान्नू अधीत्य आप्य आर्योः
वेदस्य वेद्यं ब्रवेदनीयं ब्रह्म लभंता इतिन। अपितु नतः आज्ञात्वेदस्यार्थः। एतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्
स्यः स्मृतेरर्थोदाहृतिः॥५१॥ तथापि ब्रह्मणो दुर्बोधत्वमाह॥ नेति वेदानां रहस्यस्य वेदिता ज्ञाता कश्चिन्नास्ति। क
श्चित्तु एतावेदान्तरहस्य ज्ञातापि दक्षोऽपि चित्तेन च बोधिति शाय्यात्तु बुध्यते। योऽपि स्थितः तत्त्वमसिवाक्यार्थानुसंधा
तावावेदा वेदसर्वज्ञकल्पकः। निर्विकल्पकं वेद सर्व इति जल्पे प्रकाशमानं ब्रह्म न वेद किंतु सत्ये सर्वदृष्टि
वाधावधि भूतो प्रसक्तेत त्योऽस्थित एव निर्विकं सुखं वेद॥५२॥ इममेवार्थं जंगंतरेणाह॥ नेति। वेदानां वेद्यानामहं
नवेदानां वेदिता कश्चिदस्ति कश्चिद्ध्येतान्बुध्यते वापि राजन्॥ यो वेद वेदान्न स वेद वेद्यं सत्ये स्थितो यस्तु स वेद वेद्यं॥५
नवेदानां वेदिता कश्चिदस्ति वेद्येन वेदं न विदुर्न वेद्यं॥ वैयो द वेदं स च वेद वेद्यं यो वेद वेद्यं न स वेद सत्यं॥५३॥ भो॥
कारादीनामचेतनानां मध्ये कश्चिद्वेदिता नास्ति। अतो हेतोः वेद्येन चेतसा वेदं वेद बोध्यमात्मानं न विदुः नापि वेद्यं अ
णातानमपि न विदुः। आत्मा आत्मा आत्माचनजउस्य विषयाद्विसंबंधः। ननु ज्ञउपाधी रत्या आत्मा शां यदि एव हस्य वेद
न्ययानुध्येति श्रुति रित्याशयेनाह॥ वेदमाता॥ नेतावेद ...

यस्त्वहिर्दुर्ख्वेद्यं अनात्मानं वेद स सर्वं ब्रह्मनं वेदांतयाच श्रुती भवतः आत्मनो वा अरे दर्शनेन श्रवणेन मत्या
विज्ञानेदं। सर्वं विदितं पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नांतरात्मन्निति। व्यतृणत् हिंसितवा
न्॥८३॥ तानि वेद्यं विदुः। जडत्वात् तं च प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुरिति प्रा
णादीनां प्रवर्तकत्वेन प्रसिद्धं वेदाः प्रमाणानि वेदविदः प्रमातारश्च न विदुः। यतो वाचो निवर्तंते अप्राप्य मनसा
सहेति तस्य वाङ्मनसातीतत्वश्रुतेः। यद्यप्येवं तथापि वेदं वेदितारमात्मानं वेदेनैव प्रमाणेन अहं ब्रह्मास्मीति स

वो वेदवेदास्स च वेदवेद्यं न तं विदुर्वेदविदो न वेदाः। तथापि वेदेन विदंति वेदं ये ब्राह्मणा वेदविदो भवंति॥८४॥

दिना विदंति जानंति के ते ये ब्राह्मणाः वेदविदो वेदं पाठतोऽर्थतोऽनुष्ठानतश्च विदंति ते वेदवि
दः। अध्ययनयज्ञादिना संस्कृतचित्ताः एववाक्याद्यात्मानं लक्षणया जानंति न त्वन्ये
इत्यर्थः॥८४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इदमेव हृष्टं तेन प्रतिपादयति धामांशेति॥ धाम तेजः तन्मायाः अंशाय स्य स तेजोमयोऽर्थाश्चंद्रः तस्य भागः कला
प्रतिपन्नता। तस्य संवेदने ज्ञापनेय यायथैव हि त्रसिंह महारहस्य शाखाउपादीयते। नयाहितं वैववेदाः पर
मात्मनः संवेदनेऽर्थे परमपुरुषार्थरूपे सर्वे सर्वयाप्यवाध्यैवेदा उपादीयंतइति आमनंति। तत्सोपनिषदं
पुरुषं पृच्छामी सोपनिषदश्च विशोधनात् या चामनोन्वरत्वभूतेभ्व सोऽयं देवदत्तइत्यादिवाक्यवत् तत्त्वमस्यादि

धामांशभागस्यत याहिवेदाय याश्च शाखाहि महारहस्य। संवेदनेश्चेवयथा ननंवितस्थित किंस्य परमात्मनोऽर्थे॥५५॥
उपनिषन्नाम निआरूपणं व्याख्यातारं विचक्षणं॥ यश्छिन्नविचिकित्सः स यावदे सर्वसंशयान्॥५६॥

यात्रमपि लक्षणवाक्यार्थं प्रमादपसेवेस थः॥५७॥ एवं गुरुमुपसदनपूर्वकं वाक्यार्थप्रतिपत्त्युपायमुक्त्वा गुरुलक्ष
णं आह। अमीति। आरूपणं ब्रह्मविद् लक्षणतोञ्जिज्ञानानां लक्षणमेवाह। व्याख्यातारं उपक्रमोपसंहारैकरूप्या
दिषड्विधतात्पर्यलिंगानुसारेण वाक्यार्थवर्णनकुशलं। विचक्षणं श्रुतार्थस्य युक्तिभिरनुचिंतने सावधानं।
त्रिदिध्यासनपरिपाकेन स्वयं च साक्षात्कारबलात् स्वयः छिन्नविचिकित्सः निःसंशयः सन् परस्यापि सर्वसंश
यान्व्याचष्टे छिंदनीति। अत्र स्वरूपयोविंक्षेपपरा। न्यायेन संशयान् दूरीकरोतीत्यर्थः॥५६॥

यमितिः यमज्ञयतमानं निराशं ये माद्दशं मानयंति देवादयः स एव श्रेष्ठमात्मविन्मानि ज्ञीवो न धी
ति। यं तु पशादिकर्तीयमिति मानयंति स देवानां पशुरमानितत्वं। तथा च श्रुतिः। येण एव
न्योदेवतामुपास्ते न्योसावन्योहमस्मीति न स वेद यथा पशुरेवं स देवानामिति। उप्युर्वीदिव्य
नेत्र संबंधे
न भवति ज
यमज्ञयतमाने तु मानयंति समानितः। न मान्यमानी मानी मन्येत न मान्यम इति संबंधे निरस्य प्र
लोकः स्वभाववृत्तिर्हि निमेषोन्मेषवत् सदा॥ विद्वांसो मानयंतीह इति मन्येत मा।
अधर्मभनिपुणा मूढा लोके मायाविशारदाः॥ न मान्यमानन्धिप्स्यंति मान्यानामवशं योगेच्छव
ज्ञादिना तर्पयति। ततो हेतोः ज्ञानमन्ये मान्यमानमपि मान्यं न मन्येत ज्ञानापि ज्ञापेयापेक्ष
रित। अवमाने सतीति शेषः। न कारोपि न्यत्क्रमः॥४१॥ लोकः स्वभावादेव मां मानयति न
तु मयि मानयोग्यतास्तीति मत्वा दर्पेन प्राज्ञ्या दिव्याह॥ लोक इति।४२॥ ये न मां मानयंति
ते पि पशवान्निर्विवेकत्वादुपेक्ष्या एव न तु दंड्या नीयाइत्याह अधर्मेति॥४३॥

[illegible]

मानुषे चित्ते चक्षुर्ग्राह्ये धन दारादिरूपे विषये अनाढ्याः दरिद्राः सर्वसंगत्यागिन इ
त्यर्थः। दैवे चित्ते श्रोत्रग्राह्ये पारलौकिके धर्मादौ आढ्याः संपन्नाः। तथाप्यतो ईश्वरोपा
सनायां। स्युः नतु कुर्वीत तस्योपासनायामपि नतु शब्दप्रयोगदर्शनात्। वैराग्यपूर्वकं [illegible]

अन्योन्या मानुषे लौकिके वित्ते अनाढ्या दैवे तथा ऽतो ॥ ते दुर्दर्षा दुष्प्रकंप्यास्ता ॥ परमात्मनोऽर्थे ॥ ५५ ॥
क्षणस्ता ॥ इति ॥ सर्वान्स्विष्टकृतो देवान्विद्याद्य इह कश्चन ॥ न स मानो ब्रह्म ॥ ५६ ॥
तस्मिन्प्रयतते स्वयं ॥ ५६ ॥

तोपासनानुष्ठानपरान्निर्वर्णयिष्यतीत्यर्थः। तन्त्रं स्वरूपं ॥ ५५ ॥ सर्वक्रतुभ्यो [illegible] गुरुलक्ष
णमेव श्रेष्ठमित्याह। सर्वानिति ॥ स्विष्टं शोभनं इष्टं दिव्यस्त्र्यन्नपानादिकं येषां [illegible] रूपा
ताः संतो यज्ञमानोपकुर्वंति। ते स्विष्टकृतो देवाः तान्सर्वान्योऽश्वमेधांतं सकल [illegible]
कर्त्रीवेद साक्षात्कुर्यात्। सोऽपि ब्राह्मणस्य ब्रह्मविदः समानो न भवति। तत्र हेतुः [illegible] सर्वसंग [illegible] ॥ ५६ ॥
[illegible] स्वयं प्रयतते [illegible] भवति। अयं भावः। स्विष्टं निरया साध्य

वःक्षेत्रेष्वेवमज्जोयमात्मा। घटसंवृतमाकाशंनीयमानेयथाघटे। घटोनीयेतनाकाशंतद्वज्जीवोनभो
पमइत्याद्याश्रुतौऔपाधिकंजीवपरयोर्भेदंदर्शयंति। एकधेतिईश्वररूपेणबहुधेतिजीवरूपेणएव
एवंभूतः। उत्काशयतरंगन्यायेनप्रकाशतइत्याद्यश्रुतेरर्थः। एवंचजीवेशभेदप्रयुक्तः। सर्वोपिव्य
व्यवहारःसेत्स्यति। नचपरांतरकल्पनावतरतीतिसिद्धं। कथंभूतेनअनादियोगात्वेनक्षेत्रसंबंधे
नअनादियोगेनअनादिनाआदिशून्येनाज्ञानेनहेतुनायोगःसंबंधोस्यसोनादियोगस्तेनप्रवर्तितज
न्मादिजाड्डइतिशेषः। पुंसःपुमानसःअज्ञानयोगोस्यःक्षेत्रयोगइत्यर्थः॥२०॥ जीवेशयोर्भेदंनिरस्यप्र

यएतद्भगवान्सनित्योविकारयोगेनकरोतिविश्वं॥ तथाचतद्वाग्निरितिस्ममन्यते तथार्थयोगेचभव
तिवेदाः॥२१॥

पंचस्यापिपरमेश्वरात्पृथक्सत्त्वंवारयतियएतदिति॥ वाशब्दउपमार्थोयद्वाइतिपुंस्त्वंविधेयापेक्ष
या। एतत्परिदृश्यमानंजगत्यज्ञोगादिवभातिसनित्योविका। भगवान्सर्वैश्वर्यसंपन्नःपरमात्मे
वा। वाशब्दोमिथ्यात्वद्योतकः। तथाहि। यत्रहिद्वैतमिवभव। ...तदितरइतरंपश्यति। अहमद्य
स्वप्नेगजमिवाद्राक्षमिवेदंलोकेच मिथ्यार्थानुवादेइवशब्दःप्रयुज्यते। श्रुतिश्चइदंसर्वंयद

यमात्मा। ब्रह्मैवेदं विश्वं। सर्वं खल्विदं ब्रह्मेत्याद्या प्रपंचस्य ब्रह्मात्मत्वमाह। विकारोऽन्यत्ते मायातद्यो
गेन विश्वं करोति। स्वप्नेंद्रजालवन्न तु कनककुंडलवज्जगद्ब्रह्मणोः परमार्थतो विकारविकारिभा
वोऽस्ति ब्रह्मणोऽपरिणामित्वादित्यर्थः॥ ननु नित्यपरिणामित्वं प्रधानं स्वतंत्रमेव जडस्य जगतो जड
मेव कारणमस्तु सा हि शक्त्या तु न तु चेतनं वैलक्षण्यादित्याशंक्याह। तथा च तच्छक्तिरिति। तथा च तं
नैव प्रकारेण स्वात्मनि स्वप्नवज्जगदवभासयंती तस्य परमात्मनः शक्तिः स्यादन्यथास्तीति वेदो
ऽपि मन्यते स्म। तथा च श्रूयते। देवात्मशक्तिं स्वगुणैर्निगूढामिति। परास्य शक्तिर्विविधैव श्रूय
त इति च। ननु भोग्यजातं शक्तिः भोक्तात्मा नः स्वं। भोक्तृत्वादात्मा तत्स्वामी। तथा च तयोर्भेद इत्या
शंक्याह। तथाऽधैति। शक्तिर्हि न शक्तिमतः पृथग्दृष्टा वह्नेरिव दहनप्रकाशनशक्तिः। वेदोऽपि
वक्तुः स्यां प्रजायेयेति। सच्च त्यच्चाभवदित्यादयः। वक्ताराः ... शक्तिमतोः पि ताहशार्थयोगे श
क्तिशक्तिमतोरभेदेन संबंधं प्रमाणं न वेत्तीत्यर्थः॥२१॥ एवं जीवेश्वरयोर्भेदाज्जगतो मिथ्यात्वो
धृतराष्ट्र उवाच। येऽस्मिन्नात्मधर्मान्नाचरंतीह लोके चित्तथा धर्मान्केचिदिहाचरंति॥ धर्मः पापेन प्रतिह
न्यते स्विदुताहो धर्मः प्रतिहंति पापं॥२२॥ तत्र जगज्जन्मादिनिमित्तभूतायाः शक्तेः ब्रह्मानन्यत्वात्

मानिनी देवता यमः॥ एवं क्रोधाद्यभिमानिन्योपि देवताः यमस्य दासभूताः संतीत्यधिदैवमर्थः॥ अ
ध्यात्मं तु अज्ञानादेव क्रोधादय उद्भवंति ततो म्रियत इत्यर्थः॥ ननु यद्यात्मा वा समस्तानं तर्हि तत्
आत्मनः पृथक् स्थिरं उत पृथक् सिद्धं वा॥ आद्ये सेस्तु क्रोधादीनामपि तु न बंधापत्तिः॥ आद्ये सांख्य प्रकृति
वत्तन्नाशापत्तिरित्याशंक्य मृत्युं विशिनष्टि॥ नराणामहंगतेनैव विमार्गेण चरंतीति॥ जीवा
नां योऽहंकारस्तेन सहगतं गमनं अहंकारसाहित्यं तेन विमार्गेण॥ आत्मासंगात् मार्गेण चरन् विषया
न् भुंजान इत्यर्थः॥ मुक्तावस्थानाश्रयस्याहमर्थस्य चिदाभासस्य नष्टत्वात् तन्न शुद्धात्मनः सका
शादस्थानं पुनरुदेति नापि पृथगवतिष्ठत इति भावः॥ ननु सुषुप्तावहंकारलयोपि दृश्यत इत्या
न्नवेति॥ तदानीमपि सूक्ष्मस्याहमर्थस्य सत्त्वान्न कश्चिद् ज्ञानं विना आत्मयोगमुपेति स्वं स्वं
आप्नोतीत्यर्थः॥ अतोऽहंकारनाशात्प्राक् आत्मनः क्रोधादिरूपस्य मत्स्यारूढयोग्युपत एवं स्वधीः
अस्यादोष इति पाठे आस्ते स्मिन्निरयास्य मज्ञानस्याधिष्ठानं अहंकारस्तस्मान्निःसरत इति
र्ववत्॥ आत्मयोगाभावे दोषमाहतेति॥ तेनराः मोहिताः क्रोधादिभिरिति शेषः॥ तदृशं क्रोधादि
रूपस्य मत्स्योर्वशे वर्तमानाः संतः इतोस्माल्लोकात् प्रेतागताः संतः तत्र यमलोके पुनरियस क

म्रत्युमाहुः। अयसत्यवतः कायात्पाशबद्धं वशंगतं। अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति। अस्य
व्यतिरेकमुखेन आत्मनि कल्पितत्वमाह। आत्मावसन्नामिति। आत्मनि प्रतीत्येव अवसन्नेन्नीलंतेन
रज्जुरगादिवद्यमादिकमपि आत्मनि कल्पितमेवेत्यर्थः। आत्मा वा सन्निति पाठे आत्मा आश्रयमित्य
मित्यर्थः। यमप्रशमोपायमाह। मृत्तामिति श्रुत्याचार्यप्रसादाग्र्या आत्मानुसंधानेन निरस्ताखिलक
ल्पनाजालं अमृतत्वं मोक्षहेतुः। योगिनो यमभयं नास्तीत्यर्थः। न तस्य रोगो न जरा न मृत्युरिति श्रु
तेः। ननु कल्पितस्य यमस्य मुद्गरादेरिवार्थक्रियाकारित्वं न युक्तमत आह। पित्रलोक इति। यादृ
शो यक्षस्तादृशो बलिरिति न्यायेनात्मनि कल्पितगरुडभावस्य विषनिवर्तकत्ववत्तत्राप्यर्थक्रि
याकारित्वमस्तीति भावः। अत्र युक्तिमाह। शिवइति। शीतोष्णादिवदेकस्मिन्नयस्य विरु
द्धद्वयस्यासंभवात् तस्मिन्नेव शिवत्वाशिवत्वे रज्ज्वा सर्पदंडादिवत्कल्पिते इत्यर्थः। ६। अस्यान्तः
अस्य यमस्यादेशादाज्ञातः क्रोधादिरूपा मृत्युकर्मरणहेतुर्निःसरत्युद्भवति। अन्नयध्यो ज्ञानाभि

गच्छंति अतो मत्स्यं न तरंति । देहनाशमात्रेण न मुच्यत इत्यर्थः । तथा च श्रुतिः । येयं
प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके । इति मृतस्यापि जीवनास्तित्वे
ऽपक्षिप्य योनिमन्ये प्रपद्यंते शरीरत्वाय देहिनः । स्थाणुमन्येऽनुसंयंति यथा
कर्म यथाश्रुतमिति । अस्तीत्येवोपलब्धव्य इति वास्तित्वं देहांतरप्राप्तिं चाह ।
अत्र हेतुः सदर्थेति । सत्त्वं भ्रांतस्याप्यभियोगः सदर्थयोगः यथा चक्षुरंगा
दोषेतः तस्यानवगमाद्दलाभात् समंतात् उद्धाय तिर्यग्योनिषु नोगयो
गिनः भोगलिप्सया देही देहाभिमानी प्रवर्तते ॥ ९ ॥ भोगयोगमेवाभिदर्शयति तद्
इति । यत्र अस्य पुंसः मिथ्याभूतेषु अर्थेषु शब्दादिविषयेषु योगो रागस्तद्
संगतिः प्रवृत्तिः नित्यास्वाभाविकीतदेवं इंद्रियाणां महामोहने । अर्थानां
मिथ्यात्वं संकल्पकेतत्वान्न । यदा ह्यक्षपानः दीपानिमितं रूपादयो विषयाः

क्रमनार्थोपतीति गच्छंति नरकादाविति शेषः। तत्तस्मान्नतज्ञानानुशुद्धदेवा इंद्रयादि
ष्वंते तेष्वेव गच्छंति॥ नमुत्क्रामंते प्राणो नूत्क्रामति आयाम नूत्क्रामंते सर्वे प्राणा नू
नूत्क्रामंतीति श्रुतेः॥ भुः प्राणास्यागतानि अनुशासनाच्च मत्स्करणानंमरणसं
ज्ञामपिलभते। अयेभावः। मत्स्करणंतविस्मृतिरितिसूत्रेणज्ञानेघत्यगानंद
विस्मारकत्वेनयभजमस्यकुलेनगरहीतस्यदेहस्यचविस्मारकत्वेनस
स्माद्भयमपिमत्स्करणाहितं तथावमत्सोमत्स्करणानंगोपायमशुभितं॥ न
ननुप्राकृमरणात्मत्स्फभयंमतस्यतुकनकरूपतेवास्नास्वाद्यां क्याद्द
कर्मादयैइति॥ भोगप्रदस्य कर्मणउदयेसतिकर्मफलभोगेऽनुरागो
येवाने तथाभूतास्तत्रस्वर्गादौ अनुर्थातिभोगवासनयापूर्वदेहत्यागौ

यो॰

देवालये १ स्वहस्ततनुजोगरे- रघुनाथनाम्नानुजो: गुज:सुमतिविहलास्मन्नत्वविद्वंततजौ शास्त्रिशिवमुपते
हरिहृद्धीव हीत पुत्रि: सुधाकृतचंद्रिकामतुलमानुलाउप्रहात् २ विरेचरक ग्रंथ सूत्राहिरचितानिंत्तानि यदि
भाष्यानियतंततोर्थमितिदुर्गहं विलदात्। विवियुरेपसंग्रहं द्रव यत्रोमहायासः इसदंभ्रमतिसंभ्रत्तसगुणागत्यता
त्ताभपि ३ इति श्री महस्लानिवे शोक्तसहद्रसुनल मराविरचितायोगादेंहिकासमाप्तिमगमत् श्रीकृष्णार्पण
मस्तु।। श्री संवत १७२१ मीती चैतसुदीतेरसीवारसुकरवार गंगाश्रहम श्रीगोपालसहारे श्रीकासीनाथ

राम॰

८॰

वमुन्मादिनि यत्नोहि तं कार्येप्व तानामपि निलग्नु नं स्नीह लिकसा अलकः स्थाने कमिधुक मित्रित्स्वस्थ वपुपि स्पन्जः
स्वेहस्ना सं स्पृशि मनिसु राशोषिणि दिताः १४ दसालामतिस्वा यमौ च्छनुमन्त्रय पञ्चो रंभा नीति स्मतिव समे होनि
त्नेगु गुलुमंद्यमे केत्र ये च्छो कमू छानि कारालुत यष १५ मुख जेषु नम्ने कंव लंस मनुक्ता ईक मग्रिसादि दिप
योघ ससर्पिः प्रवपष्णु स्त वृष मृघ शोणि न युं छर्ग वलि द्धौ कुसन हलकलमी कृ १६ ग्रहा गीगहेम थिनेमद्दत
रक्षेनवतीत रवं इम यु जुष्ठ विकारेखद्दिरस्स सा रथ रवितं तुयनि द्रमक्षि धीयपः श्रमहर स्तवगाहः १७ वच्छेमी
लेपुरकौ सयाऽर्वज्ञ रजिंग्र वेत था पोघ रंक्रे वागुणलु वघ रापु मसह छा वनु श्री नो दके मोहे वस्ति मुखेति वाति
कागदेपै तुरे केक घ मागह भेव मन न चतैलह विषाहोरंक्र मे गात्रिषु १८ प्रतिरोग मग्रस दितं नुप देन्न त्व धिया
समीवलकालंगिकारान् प्रविकल्प्य योजयति पः सपदे रोम पती घः लम चिरेणा सुखी स्यात् १९ स्रोतिगृहः॥ वुधल
स्मानि नि त्रि नौ तुवाज्ञीकर यो मा इतिपोगचंद्रि कायां १० इतिवाजी करणानं तरं शिश्यार शिष्टसंग्रहनं तसेनागय
तेत्नथा न्नहतजार तिम फि रवैद्य नारायणात् स्वाधीन तरकादिका परिला लयो गाहि नीयवे त्रिलन दोषुरे महतिपक्क

ग.ल.
६

कथमिव समर्थो न रपतुः २९ नवोच्चैस्तावंते खलु समयमारभ्य मिलितो यद्
गाढागाढं भवति जगतो विस्मयभरः इतीमामीहांते मनसि चिरकालं स्थित
वतीमयं संप्राप्तोऽहं सफलयितुमेवं शरणायतः ३० स्वहस्तिव्यासंगो नियतम
थमिथ्याप्रलपनं कृतं केचाभ्यां सततलपरैरन्यमननम् अपि श्री वंशा
वंममनुपुनरेवं दिधगुराग्निस्तेत्वत्कोनामहराणामपि निशितेन तद्दनम् ३१
विशान्ताभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं नयाभ्यामालीढा परम
रमणीयानवतनुः अयं हि न्यक्कारो जननि मनुजस्य श्रवणयोर्यन्नो

१8

रम:
६

यः कामस्तरणायो दिव्यसरितः २६ इदं हि ब्रह्मांडं सकलभुवनाभोगभवनं
तरंगैर्यस्यांतर्लुठति परितस्तिंदुकमिव । स एष श्रीकंठप्रथितजटाजूटज
टिलो जलानां संघातस्तव जननि तापं हरतु नः २७ त्रपंते तीर्थे निल्वरितमि
हयस्योद्धतिविधो करंकरोर्कुर्वेत्यपि किल कपालिप्रभृतयः । इमं त्वां मामं
वत्स मिपमनुकंपार्द्रहृदये पुनानासर्वेषामघमथनदर्प्यं दलयसि । २८ ।
श्वपाकानां श्रांतेरमितविचिकित्सा विचलितै विमुक्तानामेकं किल सदन
मेनः परिषहाम । अहो मामुद्धर्तुं जननि हृदयं त्साः परिकरं तव प्रलाघां कर्तुं

र्थपरार्थत्वं मोक्षप्रापकत्वं वेदाः कथयंति। एतत्कर्मणां कर्ममुक्तिहेतुत्वं विद्वान् जानन् कर्मकथं तु नउ
पैति न शरणीकरोति। कर्मभिरेव मोक्षसिद्धौ किं ज्ञानेनेति भावः॥१७॥ समाधत्ते। एवमिति॥
अविद्वान् एवं त्वदुक्तक्रमेण तत्र मोक्षपदेउपयाति तथैव अर्थजातं भोगमोक्षाख्यप्रयोजनसामान्यं
वेदाः वदंति तथा अनीहो निष्कामः परात्मा परं ब्रह्म नात्मानं देहादिकं अविद्यया आत्मत्वेन गृह्णन्नी
वः परं निर्गुणात्मानं आयाति आपि मुख्येन प्राप्नोति निष्कामः तद्दुपाध्याकार। तो सहको निष्कृत्नेन

सनत्सुजात उवाच॥ एवं ह्यविद्वानुपयाति तत्र तथार्थजातं च वदंति वेदाः॥ अनीह आयाति परं
परात्मा प्रयाति मार्गेण निहत्य मार्गान्॥१८॥

रूपेणावतिष्ठत इत्यर्थः। अन्यथा तु स एव जीवः प्र
र्गेण सुषुम्नाख्यमार्गोत्तरं तत्तल्लोकप्रापकान् निहत्य निरस्य ब्रह्मलोकद्वारा परं प्रयाति। तयोर्ध्वमा
यन्नमृतत्वमेतीति श्रुतेः। तथा च बृहदारण्ये। तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्या
णतरं रूपं कुरुते एवमेवायं शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं
वा दैवं वा प्राजापत्यं वा ब्राह्मं वेति नु कामयमानो यः अकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः स्यात् न तस्य

धोविस्मरणं वरं॥ तथापि तव न स्वास्थ्यं सर्वविस्मरणादृते इति च॥१५॥ यमं त्वेकेऽस्य च आत्मा साव
सन्नमिति यमो व्याख्यानिवल्पितः सूक्तं तद्व्याचष्टे। सक्रोधलोभात्मिति॥ यस्तु शरीरे एषः अहंप्रत्ययवि
षयः अंतरात्मा बाह्यो मनो शरीरमपेक्ष्य आंतरः चिदचिद्ग्रंथिरूपो जीवः समोहवान् अतस्मिंस्तद्बुद्धिर्मो
हः अनात्मनि देहादावात्मबुद्धिः विपर्ययरूपं ज्ञानं तद्वान् क्रोधलोभमत्सरूपो भवति भुक्तनलिकान्या
येन स्वयं बद्धः सोपि अज्ञानात्स्वात्मानं बद्धं मन्यते तेन लोभादिवशो भवतीत्यर्थः। उपसंहरति एवमिति॥
सक्रोधलोभो मोहवानंतरात्मा स वै मृत्युः स्वशरीरे य एषः। एवं मृत्युं जायमानं विदित्वा ज्ञाने तिष्ठ
न्न बिभेतीह मृत्योः॥१६॥ धृतराष्ट्र उवाच॥ यानेवाहुरिज्यया साधुलोकान्द्विजातीनां पुण्यकृतां सना
तनान्॥ तेषां परार्थं कथयंतीह वेदा एतद्विद्वान्नोति कथं नु कर्म॥१७॥ जायमानं मोहादिति शेषः। मोहावि
रोधि निज्ञाने तिष्ठन्निष्ठावाश्यमान्न बिभेति तत्र हेतुः तः विषये गोचरे तस्य ज्ञानस्य मृत्युबंधः विनश्यते।
मृत्योर्यमस्य। मर्त्यः देहः अज्ञानकृतो बंधो ज्ञानेनैव नश्यति न कर्मणेति प्रघट्टकार्थः॥१६॥ अत्र शंकते
यानिति। साधुरिज्यया सोपासनेन अश्वमेधादिना कर्मणा पुण्यतमानिंद्रलोकाद्यपेक्षया पुण्यान्।
सनातनान् व्यवहारापेक्षयानित्यान्... तेषां नमस्य लोकाश्वानेह वेदे आहुः वेदविदः तेषां लोकानां परा

अंगुष्ठेति॥ अंगुष्ठमात्रे हृदये प्रतिष्ठितत्वादंगुष्ठमात्रः एतेन हृदयपुंडरीकं ध्यानस्थलमुपदिष्टं भवति।
पूर्णः अंतरात्मा बाह्यात्मभ्योऽन्नमयादिभ्यः पंचभ्यः आंतरः। लिंगस्य। पंचप्राणमनोबुद्धिदशेंद्रियात्मकस्य।
गशरीरस्य संबंधेन नित्यं संयाति इहलोकपरलोकौ वा जाग्रत्स्वप्नौ वा गच्छति। तं ईशं यमयितारं ईड्यं स्तुत्यं अनु
कल्प्यं उपाधिमनु सर्वकार्येषु समर्थं आद्यं मूलकारणं विराजमानं प्रत्यक्चैतन्यरूपेण प्रकाशमानमपि मूढाः न
पश्यंति। तं योगिनः पश्यंति॥१५॥ नन्वंगुष्ठमात्रस्य हृदये स्थितस्य हृदयतापेन तापप्राप्तिरपि स्यात्तथा च तापस्व

अंगुष्ठमात्रः पुरुषोऽन्तरात्मा लिंगस्य योगेन स याति नित्यं॥ तमीशमीड्यमनुकल्पमाद्यं पश्यंति मूढा न विराजमानं॥१५॥
असाधना वापि ससाधना वा समानमेतद्दृश्यते मानुषेषु। समानमेतदमृतस्येतरस्य मुक्तास्तत्र मध्व उत्सं समापुः। योगिनस्तं

२६

जीवस्य कुतो मुक्तिरित्याशंक्य तस्य कदाचिदपि तापो नास्तीत्याह॥ असाधनेति॥ मानुषेषु संघाताभिमानि
षु जीवेषु केचिदसाधनाः शमादिहीनाः केचित्ससाधनास्तद्युक्ता वा भवंतु तत्स्थं एतद्ब्रह्म समानं। निर्विकारं असं
गो ह्ययं पुरुष इत्यसंगत्वश्रुतेः। एवं मुक्तबद्धयोरपि समानमिति॥ तर्हि मुक्तेषु विशेष इत्यत आह। मुक्ता इति।
तत्र तेषु मध्ये मुक्ताः मध्वः मधुनः ब्रह्मानंदस्य उत्सं उत्कर्षं परां काष्ठां समापुः संप्राप्ताः। अयं भावः। अवस्थांतरं गते
दुःखं स्यात् अवस्थांतरे दर्शनात् दुःखादिधर्म एव दुःखं भोग्यत्वात् उपाधितः प्रतिभाति स्फटिके इव जपाकुसुमलौहित्यं सर्वात्मनो
उपाधित्यागाच्च मुक्तानां न दुःखस्पर्शोऽस्तीति निर

ननु। नित्यापरोक्षं ब्रह्म यत्साक्षादपरोक्षादितिश्रुतेः अतः किं योगेनेत्याशंक्याह॥ एकमिति। हंस इव हंसः परमा
त्मा शरीरदक्षमास्थितोपि तेनज्ञासंबद्धः स चतुष्पात्सोयमात्मा चतुष्पादितिश्रुतेः। तु चैर्णीपादानां जाग्रत्स्वप्नसुषु
प्ततुरीयाख्यानां मध्ये एकं पादं तुरीयं नोत्क्षिपति न प्रकाशयति। कीदृशः सलिलात् निर्विशेषात् अतिगभीरात्। उच्चर
न्नुपर्यैव पादत्रये चरन्। तं तुरीयं पादं शिवमद्वैतं चतुर्थं मन्यंते स आत्मा स विज्ञेय इति श्रुतिप्रसिद्धं ऊर्ध्वाय उपरित
नाय पादत्रयाय विश्वतैजसप्राज्ञाख्याय तेषां चालनायेत्यर्थः। सततं व्याप्तं। तुरीयं। त्रिषु संततमित्युक्तेः। नहि चेत

र कंपादं नोत्क्षिपति सलिलाद्धंस उच्चरन्। तं चेत्सततमूर्ध्वायनं मृत्युर्नामृतं भवेत्। योगिनस्तं प्रपश्यंति॥१८

त्यानुवेधं विना विश्वादयः स्वकार्ये प्रभवंति। तं चेत् संश्यति तदा मृत्युरमृतं च अज्ञानकृतं द्वयं सति ज्ञाने काल
जये विनास्तीत्यर्थः। यद्यपि नित्यापरोक्षं ब्रह्म तथाप्युपाधिविशिष्टेनैव रूपेणापरोक्षं न तु ततो निष्कृष्टरू
पेणातस्तदापरोक्ष्याय योगोऽपेक्षित इत्यर्थः। सततमुच्छ्रितमिति पाठे उच्छ्रितं उद्गतं पादत्रयात् क्रियाविशेषण
मित्यर्थः॥१८॥

एवंरूपः वाङ्मनसातीतः जगज्जन्मादिर्योनिर्निर्विकारो योगैकगम्योयद्ज्ञानान्महाहृज्यत्येलभ्यते कर्मलौप
नास्ति स एवंरूपः परमात्मा पावकं ज्योतिःस्वरूपं योगिरनुआसनिसंहरन्नपुरुषं पश्येत्तं यो वेद तस्य अर्थः पुरुषाय
मोक्षो न रिष्यते न हिंस्यते कर्मफलवत् ज्ञानफलं नानिसमिसर्थः। यस्य ज्ञानात् येनाशो नास्ति तं योगिनः प
श्यंति ॥१८॥ न केवलं मोक्ष एव ज्ञानतः स्यात्। अपितु सर्वद्दूरस्थमपि आसन्यंतपृतमेवास्ती [illegible] याहापइति दर्श
एवंरूपेण महात्मा सपावकं पुरुषो गिरन्नु॥ यो वै तं पुरुषं वेद तस्येहास्मान रिष्यते॥ योगिनस्तं०॥१८॥ सहस्रं सहस्रा
णां पक्षान् संततसंपतेत्॥ मध्यमे मध्ये आगच्छेदपि चेत्स्यान्मनोजवः॥ योगिनस्तं०॥१९॥ नदर्शने तिष्ठति रूपमस्य
स्य पश्यंति चैनं सुविभक्तसत्त्वाः॥ हितो मनीषी मनसा [illegible] नतप्यते ये प्रव्रजेयुरमृतास्ते भवंति॥ योगिनस्तं प्रपश्यंति॥२०॥
लक्षाणि अनंतानापक्षान् कृत्वा पादरेग [illegible] सो पि मध्ये शरीरतः मध्यमे मध्यस्थे हृदयस्थे परमेश्वरे आगच्छेदेव॥ ति
ष्ठत्स्वमध्यर्थे हार्दाकाशे योगिनः पश्येती स्वर्थः। एतच्चातीतानागतादेरप्युपलक्षणं। तथा च हार्दाकाशं प्रकृत्य श्रु
यते। यच्चास्येहास्ति यच्च [illegible] नास्ति सर्वं तदस्मिन् गत्वा विंदत इति। यत्र दूरस्थो प्यासीनो योगिनः पश्यति॥२०॥ एवंविध
स्यात्मनो दर्शनार्थं योगानुगुणानि साधनांतराण्याह। नेति। चक्षुरादिग्राह्यमेनं भक्तिविचारैरेव चिंतनेन गम्यते॥ नातिप्र
र्यां हृदयं। किंच यद्भ्यपहितः जगन्निः [illegible] चं मुनीषी मनो निग्रहवालभ्यं भवति। तथा मनसा च पुत्रादीनां नाशे संयपि
न तप्यते तदेव चित्तशुद्धिः [illegible] आंतेति शेषः। एवं शास्त्राये प्रव्रजेयुः विक्षेपहेतून् कलत्रादीन् त्यजेयुस्ते संन्यासिनो अमृता भवंति।

एवं ब्रह्मज्ञानाभ्यासर्वफलावाप्तिं कृतकृत्यतां चाहडमाविति। उभौ लोकौ आत्मलोकं च विद्यया ब्रह्माकारया अंतःक
रणस्य अहमेवेदं सर्वोस्मीति सार्वात्म्याकारया च ब्रह्माव्याप्य प्रकाश्य शोभयति प्रारब्धकर्मावशेषदेहः सं
संचरति विद्वान् एवं तदा अकृतमप्यग्निहोत्रमस्य हुतमेव भवति। ज्ञाने सर्वाणि कर्मफलान्यंतर्भवंति यथा।
अतः ब्राह्मी वाक् ते नव अहं महानस्मीति वदतः लघुतां नीचतां मादधीत मा करोतु। अहं दासोस्मीति मा ब्रूहि यथा

उभौ लोकौ विद्यया व्याप्य याति तदा हुतं चाहुतमग्निहोत्रं॥ मा ते ब्राह्मी लघुतामादधीत प्रज्ञानं स्यान्ना
म धीरा लभंते॥ योगिनः संप्रपश्यंति भगवंतं सनातनं॥१७॥ ॥ ॥ ॥ ॥ ९२

तं चेद्ब्रूयुरतिवादसीति वाद्यस्मीति ब्रूयान्नापन्कुर्वीत इत्यत्यैव ब्रह्मविदामतिवादित्वदोषो नास्तीति प्रद
र्शितं। प्रज्ञानमिति। अस्य नामैव स्यात्। प्रज्ञानं ब्रह्मेति। ब्रह्मविद्ब्रह्मैवेति च श्रुतिभ्यां ब्रह्मतया। विद्रूपेण स्वम
हात्म्यं न गोपनीयं अधिकारिष्वेव। अनाहूतेषु तु गोपनीयमेव। तथा चरेत वै योगी सतां धर्ममदूषयन्। जना यथा
मन्येरन् गच्छेयुर्नैव संगतिमिति। एतच्च प्रज्ञानमिति नाम धीराः ध्यानवंत एव लभंते। यस्य नाम प्रज्ञानं तं
योगिनः पश्यंति॥१८॥

गं.ल.
७

यः स्नेहार्द्रां विगलितगतिः पुण्यगतिं प्रपतन्विश्वोद्धर्त्रीं गदविहलितः सि
क्तभिषजम् सुधासिंधुस्माकुलितहृदयो मातरमयं त्रिलोक्याः संप्राप्तस्त्वाम
हमिह विदध्याः समुचितम्॥ २४ विलीनो वै वैवस्वतनगरकोलाहल
भरो गता दूताहूतं क्वचिदपि परेतान्मृगयितुम्॥ विमानानां व्रातो विहल
यति वीथीर्दिविषदां कथा ते कल्या (गीयद्ववधि महीमण्डलगतान्॥ २५
स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वलज्ज्वालाजालज्वलितव
पुषां नः प्रतिदिनम्॥ हरंतां संतापं कमपि मरुदुल्लासलहरीछटाचंचत्पा

22

गं.ल.
५

समुत्पत्तिः पद्मारमणपदपद्मामलनखान्निवासः कंदर्पप्रतिभटजटाजूट
भवने। अथायं व्यासंगो हतपतितनिस्तारणविधेर्नकस्मात्कुलक्षेत्रव्रजन न
निजानाति। २१ नगेभ्यो यान्तीनां कथय तटिनीनां कतमया पुराणां संहर्तुः
स्मरधुनि कपर्दोधिरुरुहे। कया वा श्रीभर्तुः पदकमलमक्षालि सलिलैस्
तुलालेशो यस्मात्तव जननि दीयेत कविभिः २२ विधत्तां निःशंकं निरवधि
समाधिं विधिरहो सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः। कृतं प्रायश्चित्तैरलम
थ तपोदानयजनैः सवित्री कामानां यदि जगति जागर्ति भवती। २३ अना

पर्वोऽध्यायानां संकल्पासिद्धः सत्यसंकल्पः संकल्प्यमानं त्वनीयपदार्थानां ब्रह्मलोकादीना
मधिष्ठाता भवति ब्रह्मवित् । तथा च श्रुतिः आप्नोति स्वाराज्यं आप्नोति मनसस्पतिं वाक्पति
श्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिरिति । स्वराजो भावः स्वाराज्यं आहैश्वर्यं ॥ ४६ ॥ तस्य संकल्प
स्य श्रवणेन च सेन सदाप्येन । आत्माज्ञानाद्ध्यसंकल्पत्वे सतीत्यर्थः । दीक्षितव्रतमुरीकरणं वा
त्यमनादिकं कुर्यात् । एतच्चाम दीक्षितस्य तितद्दीक्षाव्रतादेः शोरणेन न धातुनाविद्याप्रसंगात्
न निष्पन्नो । कर्मजः संस्कार आगंतुको विनाशी चेत्यर्थः । सतां तु सत्यमेव परब्रह्मैव श्रेष्ठं । त
त्कर्त्तव्ये नाविनाशित्वात् ॥ ४७ ॥ एतदेव स्पष्टयति ज्ञानमिति ॥ यस्य संशोकमोहनिवृत्तिस्तं ज्ञा
नफलं प्रत्यक्षमित्यर्थः । तवेः कायिकं वाचिकं मानसिकं च तत्परोक्षमामुष्मिकफलप्रदमित्यर्थः ।
विद्यादिसर्वेन परोक्षज्ञानस्य व्यावृत्तिरिहोच्यते ॥ ४८ ॥ उक्तमेवोपसंहरति । तस्मादिति । जल्पितै
ज्जनैश्चैव तस्य दीक्षितव्रतं नाचरेत् ॥ नामैतत् तु निर्वृत्तं स समेव सतां परं ॥ ४९ ॥ ज्ञाने
यैना न प्रत्यक्षं परोक्षं जायते तपः ॥ विद्याहृहपठितं तु द्विजैर्वै बहुपाठिनेः ॥ ५० ॥ तस्मात्त्वं त्रिवमा
मेष्वाजल्पितैर्नैव वेद द्विजं ॥ बाणध सस्नाना येति सर्वथा ब्रात्यकं त्वया ॥ ५१ ॥ उक्तमेवोपसंहरति
तस्मादिति ॥ जल्पितेनैव वेदवेदांगाध्ययनेनैव । सत्यासत्यमगत्या नेदानुत्ताच श्रुतिः । वाचारंनद्वारंग

एवमितिासंप्रसंगेन छलानंदवेश्यसंगशालावासकुवेश्यौ भानुर्गनद्यामादिकं कर्तुं प्रवर्तत इत्य
र्थः ॥४२॥ संसारादिति। तथा भवेत्। परमानंदास्य स्थैर्यतस्य दर्शनेद विषयो मिलाद । भवेत् लि
त स्वासौ पत्नुः ज्योतिष्टोमादिः श्रुतायेत संतेयते। सस्य वेदवचनस्य ज्योतिष्टोमेन स्वर्गका
मो यजेतेत्यादेः अवधारणात् आत्मज्ञानमेव यात्। संकल्पोचितधीर्भवेदिति पाठे सत्यसंकल्पः

४२

एवं वेदमविज्ञाय प्राज्ञोऽहमिति मन्यते ॥ दानव यज्ञयोगादीन् स्ववर्तते ॥४४॥ सत्या
त्त्वमवमानीनो संकल्पश्चता भवेत् ॥ ततो दज्ञः प्रतायेत सत्स्वैवावधारणात् ॥४५॥ म
नसा न्यस्य भवतिवा चांत्यस्याप कर्मणा ॥ संकल्पसिद्धः पुरुषः संकल्पान्न निवर्तति ॥४६॥

सत्यसंकल्पत्वे प्राप्ते तु संकल्पोयत्य इत्यर्थः। सत्यत्वाद्यज्ञो विसत्यस्यानवधारणात् अपरोक्षे
पि अनिश्चयाद् प्रवर्तते। ज्ञाते तु सत्ये तत्र हुत्वा बुद्धिमान् त्यागकृतकृत्यो भवतीति कृत
कृत्य एव मैवमुपैति ॥४५॥ मनसेति। यद्यपि तु क्रियते। अन्यस्य एतस्य यज्ञो मनसा दृश्यत्वात् नादिरू
पो भवति। वाचा ... यज्ञ जपादिरूपो यज्ञो भवति कर्मणा प्रासिद्धो ज्योतिष्टोमादिः एतेषां द्रव्यैः

स्वप्नेयोभवंतिविचित्राश्चता नचता नसंतीतिवक्तुं शक्यं अनुभूयमानत्वात्। नापिसंती
ति। ज्ञानेन सद्यो बाधात्। एवं ब्रह्मण्यपि विचित्राः अनिर्वचनीयाः सृष्टयः संतीति सूत्रार्थः। त
था चास्य जगतः अनिर्वचनीयत्वं श्रुतिराह। को अद्धा वेद क इह प्रवोचत् कुत आजाता
कुत इयं विसृष्टिरिति। न कोपि वेद। न कोपि प्रावोचदिति श्रुत्यर्थः। सेयं व्यामिश्रदृष्टिः।
अपवाददृष्टिस्तु आत्मैव तन्मात्रमिति सूत्रिता। स यथा सैंधवखिल्य उदके प्रास्त उदकमे
वानुविलीयेत। स यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवं वा अरेयमात्मा क
ृत्स्नः प्रज्ञानघन इति श्रुत्या दर्शिता। यथा जले प्रास्तः सैंधवखिल्यः स्वोपादाने उदके ज
ले लीनं मनुष्यमपि लीयते। स्थावरकाले यद्वज्जले परिमाणाधिक्यं स्यात्। अतः
सम्यक्तत्कारणं वा स्वघीनीभावः। तदुपपत्तिः केवलरसत्वमात्मना अलेऽपि व्यक्तोद
यते। एवमयं प्रपंचः कार्यकारणोभयस्वरूपहीनः समाधौ केवलप्रज्ञानघनोऽवशिष्य
ते इति श्रुत्यर्थः। अनेन दृष्टिद्वयेन जननोधार्थं शास्त्रे प्रवृत्तोपयोगे संक्षेपशारीरके।

आरोपदृष्टिः प्रमादकृद्दृष्टिरेवं आभिरूपदृष्टिरितिदृष्टिविभागमेवं ।संप्रत्ययस्तु च स्वच्छन्दं पुरुषं मुमुक्षुं समवर्तयामास वाची धिधितु मुमुक्षुं हते क्रमेण यादिना ।अलिवचो सिमुनि आरोग्यानि चरु अविराद गौरपि सर्वेशः ॥ अथमप्येषु ह सोत्रितयं विनानहि च सुपर्याति कदाचन संततेन ॥४२॥ श्लोः॥

एवमनेकेषु पक्षेषु पक्षस्थापितेषु सिद्धांतमाह ॥ एकस्येति ।ब्रह्मैव एकं वेद्यं तच्च सत्यं कोल त्रयेपवा च्यं तस्य अज्ञानात् बहूनि वेद्यानि इन्द्रियाणि अब्रह्मभूतानि कृतानि कल्पितानि वेदेषु प्रतिपत्तव्यं ।तेषां मध्ये ब्रह्मैवं वेद एवाहं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति ।तस्मिन्नेव सर्वेषां ब्रह्मणि कारणिके देवं अवस्थितः ।ब्रह्मलानोऽतिदुर्घटस्य सर्वेषां ।अस्तित्वे सनस्कृज्ञातः चा ।एकस्य वेदस्याज्ञानाद्बहुत्वेन बहवः कृताः ॥ स सस्येकस्य राजेन्द्र सत्येकाभिधं देवास्थितः ॥४३॥

ज्ञानकार्य संगतमाह ॥ तुच्छेनाभ्वपिहितं यदासीत्तमसस्तन्महिनाऽजायतैकमिति ।तुच्छेन रज्जूरगादिवदुपस्तेनमिथ्यावृते नतमसाऽज्ञानेन सर्वव्यापकं ब्रह्म अपिहितमाच्छादितं यत् आसीत् तत्र एकमेव सत् तमसः अज्ञानस्य ।तपस इति पाठे आलोचनस्य संकल्पमात्रस्य महिमा माहात्म्येन अजायत प्रपंचकारणभूत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नरतास

क्लिविकलान्ग्रह ग्रस्तानस्तापित्तदुरितान्नित्तारसरणीन्· निर्लिपोर्नि
र्मुक्तानपिचान्निरयान्निपतितान्नरानेवाजुर्ल्वमिह परमंभेषजमसि· १५ ।
स्वभावस्वच्छानांसहजशिशिरशाणामपमसामपारस्तेमातर्जगतिमहिमा ।
यतोपिजयति· मुहार्यगायंतिधुतत्नमनवधघुतिभृतः समासाद्याद्यापिस्फु
रपुत्तकसांद्राः सगरजाः १६ कृतक्षुद्रैनस्कानथक्टितिसंतप्तमनसः
समुद्धर्तुंसंतित्रिभुवनतलेतीर्थनिवहाः· अपिप्रायश्चित्तप्रसरणपथातो
तचरितान्नरानूर्ध्वंनेतुंत्वमिवजननिलंविजयसे· १७ निदानंधर्माणां

गं०त्त
४

किमपिविविधानेनवमुह्वांसधानेतीर्थानामम्लपरीधानेत्रिजगतः समाधानेगुरेधरवतुतिरोधानमपियांछ्रिया — माधानेनः परिहरतुनापं तवपत्रः॥ १८ पुरोधावंधावंद्रविणमदिरा घूर्णितदृशां महीपानांनानातरुणतररवेदस्यनियतम्॥ ममैवायंमंतुः स्वहितशतहंतुर्जडधियोवियोगस्तेमातर्यदिहिकरुणातः त्तणमपि॥ १९ मरुल्लीलालोलल्लहरिलुलितांभोजपटलीस्खलत्यांसुव्रातच्छुरणविलसत्कौंकुमरुचि। सुरस्त्रीवक्षोजत्तरदृगनाभिजंबालजटिलेजलेतेजंबालेममजननजालंजरयतु॥ २०

राम
४

विं मात्मतत्त्वप्रकाशेनेत्यत आह। ज्ञानेन चात्मानमुपैतीति। आत्मज्ञानान्न परं वि
घते। आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनु
संज्वरेदित्यादिशास्त्रादात्मज्ञानमेव परमपुरुषार्थ इति भावः। विपक्षे दोषमाह। अ
थेति प्रश्नांतरे अन्यथा आत्मज्ञानाभावेन अनात्मनि पुरुषार्थत्वबुद्ध्या वर्गफलानु
कांक्षी भवति। हंके आत्मानं स्वस्वविषयोपहारमुखेन आरूपोतीति यर्गः। इंद्रियग
ज्ञानेन चात्मानमुपैतीति विद्वान्तथान्यथा वर्गफलानुकांक्षी॥ अस्मिन्नूकं तंत सरिग्रहस
र्वे अमुत्र भुंक्ते पुनरेति मार्गी॥२॥ पापस्याप्रियंकृत्वं विषयसुखं तदाकांक्षी सन्नू अ
स्मिन्लोके कृतं यत्सुपर्यंतपापं वा तत्सर्वं परिग्रहीतो विधाकर्मणी समन्वारभेते पूर्वप्रज्ञा चे
तिश्रुतेः। तेन कामातिमितिश्रुतिपदस्यार्थः। अमुत्र स्वर्गे नरके वा तत्स्थं सुखं दुःखं वा भुंक्ते
ततः पुनारमंमा भज्ञो कं कर्मशेषेणापत्पतेति। तस्मिन्न्यावत्संपातमुषित्वाथैतमेवात्मानं पुन

नन्वेवं तर्हि स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः तद्धि तपस्तद्धि तप इत्यादेरेण स्वाध्यायप्रवचनयोर्मुख्यतपस्त्व
श्रावणात् अस्ति तयोरपि मोक्षहेतुत्वं तत्कथमुच्यते । न छन्दांसि वृजिनात्तारयन्तीति मत्वा विरुद्धं विहृत्तपसो
जैद्माह अस्मिन्निति । अविदुषां तपसः फलम् आमुष्मिकं । विदुषां ब्राह्मणानां तु इमे एव लोकाः फलदाः आनंद
रूपा इत्यर्थः । कीदृशानां ऊर्ध्वे तपसि तिष्ठतां । ऊर्ध्वे ध्यातव्ये । ब्रह्मार्थे तपस्येके न्वेष्यत्वेन इति ध्यानः त्वेन । अ
वश्यकर्त्तव्ये इत्यर्थः । तथा श्रीमोक्षप्रस्तपः शौचमिति भागवते ऊर्ध्वे तपसीति पाठस्य कोर्थः ॥१०॥

